गणः। कवचधारियोद्धृसमूहः। इत्यमरः। २। ८। ६६॥

कावारं, क्ली, (कं जलं आवृणोतीति। आ + वृ + अण्।) शैवलः। इति त्रिकाण्डशेषः॥

कावारी, स्त्री, (कावार + ङीष्।) वृक्षादिच्छत्रम्। तत्पर्य्यायः। जङ्गमकुटी २ भ्रमत्कुटी ३। इति त्रिकाण्डशेषः॥

कावृकः, पुं, (कुत्सितः वृक इव ईषत् वृक इव वा। कोः कादेशः।) कुक्कुटः। चक्रवाकः। पीतमस्तकपक्षी। इति विश्वमेदिन्यौ॥

कावेरं, क्ली, (कस्य सूर्य्यस्येव आ ईषत् वेरं अङ्गं यस्य। ज्योतिर्मयत्वात् तथात्वम्।) कुङ्कुमम्। इति जटाधरः॥ (कुङ्कुमशब्देऽस्य विवरणं ज्ञातव्यम्॥)

कावेरी, स्त्री, (कं जलमेव वेरं शरीरं। तस्येयम्। "तस्येदम्"। ४।३।१२०। इति अण्। ङीप्।) नदीविशेषः। इत्यमरः। १। १०। ३५॥ (यथा, महाभारते ३। ८५। २२।
"ततो गच्छेत कावेरीं वृतामप्सरसां गणैः।
तत्र स्नात्वा नरो राजन् गोसहस्रफलं लभेत्"॥
इयं हि सह्याद्रेः मलयपर्व्वतस्य च सानुसन्निकटस्था। इति रघुः॥ कुत्सितं अपवित्रं वेरं शरीरं यस्याः। कोः कादेशः।) वेश्या। हरिद्रा। इति मेदिनी॥

काव्यं, क्ली, (कवेरिदं कर्म्म भावो वा। ष्यञ्।) ग्रन्थः। इति मेदिनी॥ रसयुक्तवाक्यम्। यथा,—
"वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षकाः।
उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः"॥
एषां प्रत्येकं लक्षणानि लिख्यन्ते। तत्रादौ वाक्यलक्षणं यथा,—
"वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः"॥

रसलक्षणं यथा,—
"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम्"॥

दोषलक्षणं यथा,—
रसापकर्षका दोषास्ते पुनः पञ्चधा मताः।
पदे तदंशे वाक्यार्थे सम्भवन्ति रसेऽपि यत्"॥

गुणलक्षणं यथा,—
"रसस्याङ्गित्वमाप्तस्य धर्म्माः शौर्य्यादयो यथा।
गुणा माधुर्य्यमोजोऽथ प्रसाद इति ते त्रिधा"॥

अलङ्कारलक्षणं यथा,—
"शब्दार्थयोरस्थिरा ये धर्म्माः शोभातिशायिनः॥
रसादीनुपकुर्व्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्"॥

रीतिलक्षणं यथा,—
"पदसंघटनारीतिरङ्गसंस्थाविशेषवत्।
उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्व्विधा।
वैदर्भी चाथ गौड़ी च पाञ्चाली लाटिका तथा"॥
इति साहित्यदर्पणम्॥ *॥ तत् काव्यं त्रिविधं ध्वनिगुणीभूतव्यङ्ग्यचित्रभेदेन। तत्राद्यस्य लक्षणम्।
"इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्यात् ध्वनिर्बुधैः कथितः"। द्वितीयस्य लक्षणम्।
"अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्"॥

तृतीयस्य लक्षणम्।
"शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्"।
इति काव्यप्रकाशः॥
"एतेषां विवरणानि तत्तच्छब्दे द्रष्टव्यानि"॥

काव्यः, पुं, (कवेः भृगोरपत्यं पुमान् इति "कुर्व्वादिभ्यो ण्यः" ४। १। १५१। इति ण्यः। यञ् इति केचित्।) शुक्राचार्य्यः। इति मेदिनी॥ (यथा, महाभारते १। सम्भवपर्व्वणि ७६। ६।
"जिगीषया ततो देवा वव्रिरेऽङ्गिरसं मुनिम्।
पौरहित्येन याज्यत्वे काव्यं तूशनसं परे"।
तामसमन्वन्तरीयऋषिविशेषः। यथा, मार्कण्डेये ७४। ५९।
"ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्बलकस्तथा।
पीवरश्च तथा ब्रह्मन् सप्त सप्तर्षयोऽभवन्"॥)

काव्यचौरः, पुं, (काव्यस्य चौर इव। अन्यरचितकाव्यस्य स्वकीयत्वेन प्रख्यापकत्वात् तस्य तथात्वं बोध्यम्।) चन्द्रगुप्तः। इति त्रिकाण्डशेषः॥

काव्या, स्त्री, (कववर्णने स्तुतिगाने च। बाहुलकादित्वात् ण्यत्। टाप् च। पूतनाया हि वाक्विलासविन्यासादिना नारीणां मनो मोहयित्वा ताभ्यो शिशूनाकृष्य नाशकारितया तथात्वं बोध्यम्।) पूतना। बुद्धिः। इति मेदिनी॥

काश ऋ ङ द्युतौ। कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ऋ अचकाशत्। ङ काशते चन्द्रः। दन्त्यान्त इति केचित्। इति दुर्गादासः॥

काश य उ ऋ ङ द्युतौ। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-अकं-सेट्।) य ङ काश्यते। उ काशित्वा काष्ट्वा। ऋ अचकाशत्। इति दुर्गादासः॥

काशः, पुं क्ली, (काशते दीप्यते शोभते इति यावत्। काश ङ दीप्तौ + पचाद्यच्।) तृणभेदः। केशिया इति भाषा। इति मेदिनी॥ (यथा रघुः ४। १७।
"पुण्डरीकातपत्रस्तं विकसत् काशचामरः।
ऋतुर्विड़म्बयामास न पुनः प्राप तच्छ्रियम्"॥)
तत्पर्य्यायः॥ इक्षुगन्धा २ पोटगलः ३। इत्यमरः। २। ४। १६२॥ कासः ४। इति भरतः॥ काशी। ५। इति मुकुटादयः॥ काशा ६। इति नयनानन्दः॥ वायसेक्षुः ७ काण्डेक्षुः ८ अमरपुष्पकः ९। इति रत्नमाला॥ काशकः १० वनहासकः ११। इति शब्दरत्नावली॥ इक्ष्वारिः १२ काकेक्षुः १३ इक्षुरः १४ इक्षुकाण्डः १५ शारदः १६ सितपुष्पकः १७ नादेयः १८ दर्भपत्रः १९ लेखनः २० काण्डकाण्डकः २१ कच्छलकारकः २२। अस्य गुणाः। शिशिरत्वम्। गौल्यत्वम्। रुचिकारित्वम्। पित्तदाहनाशित्वम्। तृप्तिबलशुक्रकारित्वम्। श्रमशोषकफापहत्वञ्च। इति राजनिर्घण्टः॥ कण्ठकण्डूयनम्। इति शब्दरत्नावली॥ तत्पर्य्यायगुणाः।
"काशः काकेक्षुरुद्दिष्टः स स्यादिक्षुरसस्तथा।
इक्ष्वालिकेक्षुगन्धा च तथा पोटगलः स्मृतः॥
काशः स्यान्मधुरस्तिक्तः स्वादुपाके हिमः सरः।
मूत्रकृच्छ्राश्मदाहास्रक्षयपित्तजरोगजित्"॥
इति भावप्रकाशः॥

काशः, पुं, (केन जलेन कफात्मकेन अश्यते व्याप्यतेऽत्र। क + अश + अधिकरणे घञ्।) क्षतम्। इति शब्दरत्नावली॥ स्वनामख्यातरोगविशेषः। काशी इति भाषा। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। क्षवथुः २ काशिका ३। इति शब्दरत्नावली॥ कासः ४। इत्यमरः। २। ४। १६१॥ कासयति कुत्सितशब्दं कारयति कासः। कासृङ् कुशब्दे दन्त्यान्तात् पचाद्यच् कासो दन्त्यान्तः। काश शब्दे इत्यस्मात् शान्तात् पचाद्यनि काशस्तालव्यान्तश्च। शालूरकाशशल्लक्य इत्युभभेदे दन्त्यतालव्यान्तमध्ये पाठात्।
"वाराणस्यां भवेत् काशी क्षवथौ ना तृणे स्त्रिया"।
मिति तालव्यान्तेषु रभसः। इति तट्टीकायां भरतः॥ *॥ तस्य निदानं यथा,—

धन्वन्तरिरुवाच।
"आशुकारी यतः काशः स एवातः प्रवक्ष्यते।
पञ्च काशाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः॥
क्षयायोपेक्षिताः सर्व्वे बलिनश्चोत्तरोत्तरम्।
तेषां भविष्यतां रूपं कण्ठे कण्डूररोचकः॥
शूककर्णास्यकण्ठत्वं तत्राधो विहितोऽनिलः।
ऊर्द्ध्वं प्रवृत्तः प्राप्योरस्तस्मिन् कण्ठे च संस्वजन्॥
शिरः श्रोतांसि संपूर्य्य ततोऽङ्गान्युत्क्षिपन्ति च।
क्षिपन्निवाक्षिणी पृष्ठमुरः पार्श्वे च पीड़यन्॥
प्रवर्त्तते स वक्त्रेण भिन्नकांस्योपमध्वनिः।
हृत्पार्श्वोरःशिरःशूलमोहक्षोभस्वरक्षयान्॥
करोति शुष्ककाशञ्च महावेगरुजा स्वनम्।
सोऽङ्गहर्षी कफं शुष्कं कृच्छ्रान्मुक्तोऽल्पतां व्रजेत्॥
पित्तात्तु पीताक्षिकता तिक्तास्यत्वं ज्वरो भ्रमः।
पित्तासृग्वमनं तृष्णा वैस्वर्य्यं धूमको मदः॥
प्रततं काशवेगे च ज्योतिषामिव दर्शनम्।
कफादुरोऽल्परुङ्मूर्द्धहृदयं स्तिमितं गुरु॥
कण्ठे प्रलेपदमनं पीनसच्छर्द्दारोचकः।
रोमहर्षघनस्निग्धश्लेष्मणश्च प्रवर्द्धनम्॥
युद्धाद्यैः साहसैस्तैस्तैः सेवितैरयथाबलम्।
उरस्यन्तःक्षतो वायुः पित्ते चानुगतो बली॥
कुपितः कुरुते काशं कफं तेन सशोणितम्।
पीतश्यावञ्च शुष्कञ्च ग्रथितं क्वथितं बहु॥
ष्ठीवेत् कण्ठेन रुजता विभिन्नेनेव चोरसा।
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना॥
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यकम्पवान्।
पारावत इवोत्कूजन् पार्श्वशूली ततोऽस्य च॥
कफाद्यैर्वमनं पक्तिर्बलं वर्णश्च क्षीयते।
क्षीणस्य सासृङ्मूत्रत्वं श्यावपृष्ठकटीग्रहः॥
वायप्रधानाः कुपिता धातवो राजयक्ष्मणः।
कुर्व्वन्ति यक्ष्मायतनैः काशं ष्ठीवेत् कफं ततः॥
पूतिपूयोपमं पीतं विस्रं हरितलोहितम्।
लुप्यते तुद्यत इव हृदयं पचतीव च॥
अकस्मादुष्णं शीतेच्छा बह्वाशित्वं बलक्षयः।
स्निग्धप्रसन्नवक्त्रत्वं श्रीमद्दर्शननेत्रता॥
ततोऽस्य क्षयरूपाणि सर्व्वाण्याविर्भवन्ति च।
इत्येवं क्षयजः काशः क्षीणानां देहनाशनः॥
याप्यो वा बलिनां तद्वत् क्षतजोऽपि नवौ च तौ।
सिध्येतामपि सामर्थ्यात् साध्यादौ च पृथक्क्रमः॥
मिश्रायाप्यास्तु ये सर्व्वे जरसः स्थविरस्य च।